## किदाशिषि । (१०४/२२१६)

आशिषि[1] यो लिङ्, तस्य यासुडागमो [2]भवति, स चोदात्तः किद्वद् भवति । प्रत्ययस्यैवेदं कित्त्वम्, नागमस्य, प्रयोजनाभावात् । [3]ङित्त्वे प्राप्ते कित्त्वं विधीयते । गुणवृद्धिप्रतिषेधः तुल्यः, सम्प्रसारणम्, [4]जागर्तेर्गुणे च विशेषः । [5]इष्यात्, इष्यास्ताम्, इष्यासुः । जागर्यात्, जागर्यास्ताम्, जागर्यासुः । आशिषि इति किम् ? [6]वच्यात् । जागृयात् ॥

## झस्य रन् । (१०५/२२५६)

[7]लिङः इत्येव । झस्य लिङादेशस्य रन् इत्ययमादेशो भवति । झोऽन्तापवादः[8] । पचेरन्[9] । यजेरन् । [10]कृषीरन् ॥

## इटोऽत् । (१०६/२२५७)

[11]लिङादेशस्य इटः अत् इत्ययमादेशो भवति । पचेय । यजेय । कृषीय । हृषीय । तकारस्य इत्सञ्ज्ञाप्रतिषेधः प्राप्नोति, 'न विभक्तौ तुस्माः' (१.३.४/१९०) इति ? नैवायमादेशावयवस्तकारः, किं तर्हि, मुखसुखार्थ उच्चार्यते । आगमस्येटो ग्रहणं न भवति, 'अर्थवद्ग्रहणे नानार्थकस्य ग्रहणम्' (व्या.प.१) इति ॥

## सुट् तिथोः । (१०७/२२१०)

लिङः इत्येव । लिङसम्बन्धिनोः तकारथकारयोः सुडागमो भवति । तकारथकारावागमिनौ, लिङ [12]तद्विशेषणम् । [13]सीयुटस्तु लिङेवागमी । [14]तेन भिन्नविषयत्वात् सुटा [15]बाधनं न भवति । तकारे इकार उच्चारणार्थः । कृषीष्ट । कृषीयास्ताम् । कृषीष्ठाः । कृषीयास्थाम् ॥

## झेर्जुस् । (१०८/२२१३)

[16]लिङः इत्येव । लिङादेशस्य झेर्जुस् [17]आदेशो भवति । झोऽन्तापवादः । पचेयुः । यजेयुः ॥

## सिजभ्यस्तविदिभ्यश्च । (१०९/२२२६)

अलिङर्थः आरम्भः । सिचः परस्य, अभ्यस्तसञ्ज्ञकेभ्यो, वेत्तेश्चोत्तरस्य[18] झेर्जुस् आदेशो भवति[19] । अभ्यस्त[20]विदिग्रहणम् असिजर्थम् । ङित इति चानुवर्तते । सिचस्तावत् – अकार्षुः । अहार्षुः । अभ्यस्तात् – अबिभयुः । अजिह्रयुः । अजागरुः । विदेः – अविदुः ॥

---

1. विषये इत्यधिकम् फ. 2. भवति नास्ति फ, यासुट् किद् भवति ब. 3. पूर्वेण इत्यधिकम् क. 4. जाग्रोऽविचिण्णाल्ङित्सु इति गुणे क, जागर्ति गुणे च ब. 5. इज्यात् अ. ब. क, इज्यास्ताम् अ. फ, इज्यासुः फ. 6. वध्यात् ब. 7. वाक्यमिदं नास्ति फ. 8. स च उदात्तो भवति इत्यधिकम् ब. 9. पक्षीरन् इत्यधिकम् फ. ह,, यजेरन् नास्ति फ. 10. भृषीरन् फ, हृषीरन् अ. ह. 11. लिङः इत्येव इत्यधिकम् ह. 12. तस्य विशेषणम् फ तु विशेषणम् ब. 13. यासुटः ब. 14. तेन नास्ति फ. 15. बाधा ब. 16. वाक्यमिदं नास्ति फ. 17. इत्ययमादेशः ब. 18. ङिल्लकारसम्बन्धिनः इत्यधिकम् फ. 19. अन्तादेशे प्राप्ते इत्यधिकम् फ. 20. विदि नास्ति फ.